# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री | प्रश्नपत्रम् – ५ | गुणाः – ५० |
| विषयः – नव्यव्याकरणम् | सत्रम् – ६ (OLD) | समयः – १०:०० तः १२:०० |
| दिनाङ्कः – १७/०७/२०२१ | सन्दर्भग्रन्थः – परिभाषेन्दुशेखरः वाक्यपदीयञ्च | |

सूचना - निम्नलिखितेषु दशसु प्रश्नेषु केचित् पञ्च प्रश्नाः विधेयाः।
प्रत्येकं प्रश्नस्य समानगुणाः। (१०)

**प्रश्नः १ कयोरपि द्वयोः उत्तरे लेख्ये।** १०

१ "क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते" इति परिभाषां सावतरणं व्याकुर्वन्तु।

२ 'उपसञ्जनिष्यमाणनिमित्तोऽप्यवाद उपसञ्जातनिमित्तमप्युत्सर्गं बाधते' इति परिभाषाया अर्थनिरूपणपूर्वकम् अस्यां प्रमाणं फलञ्च निरूपयन्तु।

३ अपवादपदार्थं निरूप्यबाधबीजानि सोदाहरणानि परिभाषेन्दुरीत्या लेख्यानि।

**प्रश्नः २ 'प्रकल्प चापवादविषयं तत उत्सर्गोऽभिनिविशते' परिभाषायाः अवतरणं प्रयोजनं च लिखन्तु।** १०

**प्रश्नः ३ 'पुरस्तापवादा अनन्तरान्विधीन्बाधन्ते नोत्तरान्' इति परिभाषां सावतरणं व्याकुरुत।** १०

**प्रश्नः ४ अधस्तेषु द्वौ प्रश्नौ समाधेयौ।** १०

१ अभ्यासविकारेषु बाध्यबाधकभावो नास्ति इति परिभाषां व्याख्याय कैयटोक्तिं दूषयत।

२ उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् इति परिभाषां सावतरणं व्याकुरुत।

३ परिभाषेन्दुशेखरे व्याख्यातानां परिभाषाणां भेदोपभेदादिकं निरूपयन्तु।

**प्रश्नः ५ 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति परिभाषां फलप्रमाणोपस्थापनपुरस्सरं व्याख्याय एतस्या अप्रवृत्तिस्थलानि निर्देष्टव्यानि।** १०

**प्रश्नः ६ अपवादो यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यते इति परिभाषाया ज्ञापकं विषयञ्च सम्यक् लिखत।** १०

**प्रश्नः ७ कयोश्चिद् द्वयोः कारिकयोः व्याख्या विधेया।** १०

१ शिष्टेभ्य आगमात् सिद्धाः साधवो धर्मसाधनम्।
अर्थप्रत्ययनाभेदे विपरीतास्त्वसाधवः।।

२ अवस्थादेशकालानां भेदाद्भिन्नासु शक्तिषु।
भावनामनुमानेन प्रसिद्धिरतिदुर्लभा।।

३ इदं पुण्यमिदं पापमित्येतस्मिन्पदद्वये।
आचाण्डालं मनुष्याणामल्पं शास्त्रप्रयोजनम्।।

**प्रश्नः ८ स्फोटनादयोः सम्बन्धः वाक्यपदीयदृष्ट्या लिखत।** १०

**प्रश्नः ९ व्याकरणे वा व्याकरणदर्शने वाक्यपदीयस्य स्थानं विवृणुत।** १०

**प्रश्नः १० निम्नलिखितेषु प्रश्नेषु दशप्रश्नानां लघूत्तरं देयम्।**

१ परिभाषेन्दुशेखरस्य कर्ता कः? १०

२ परिभाषेन्दुशेखरस्य द्वयोः टीकयोः नाम लिखत।

३ परिभाषेन्दुशेखरस्य का व्युत्पत्तिर्भवति।

४ 'मध्येऽपवादा' इति न्यायापेक्षयाऽनन्तरस्येति न्यायः प्रबलः इति अष्टाभ्य सूत्रे कः वदति?

५ शास्त्रशेषनामके प्रकरणे कति परिभाषाः सन्ति?

६ अकृतव्युहाः के?

७ पूर्वमपवादाः बुध्यारूढाः भवन्ति वा उत्सर्गाः?

८ कुत्रापवाद अन्तरङ्गेण बाघते?

९ क्तल्युट्तुमन्खवलर्थेषु वाऽसरूपविधिर्भवति न वा?

१० लादेशेषु वाऽसरूपविधिर्भवति न वा?

११ बाधबीजनामके प्रकरणे कति परिभाषाः सन्ति?

१२ वाक्यपदीयस्य लेखकः कः?

१३ ब्रह्मकाण्डे कति कारिकाः सन्ति?

१४ आम्नायमानं ज्ञाने धर्मे च कीदृशमस्ति?

१५ शब्दसाधुत्वज्ञानाय शब्दसिद्धये च व्याकरणदर्शनं कति सिद्धान् पदार्थान् अङ्गीकरोति?

****